348sk26

२६

अर्थालङ्कारः

प्रस्तावना

पूर्वतने पाठे शब्दालङ्कारः निरूपितः आसीत्। सम्प्रति अर्थालङ्कारं निरूपयितुं प्रकरणम् इदम् आरभ्यते। अस्माभिः पूर्वतने पाठे सौन्दर्यम् अलङ्कारः इति तु पठितम्। कः अलंक्रियते। शब्दः अर्थो वा। तदद्वारा काव्यात्मा रसः। अलंकारः कुत्र स्थितः। शब्दार्थयोः। सालंकारस्य काव्यता इति कुन्तकः। अतो यथा केयूरहारादयः शरीरसौन्दर्यजननद्वारा। पर्यन्ते आत्मनः सौन्दर्यं वर्धयन्ति तथा काव्यशरीरभूतयोः शब्दार्थयोः सौन्दर्यमुत्पादयन्तः तद्द्वारा काव्यात्मानं रसं परिपुष्णन्ति। परमार्थतः उक्तिवैचित्र्यं अलंकारः। किमर्थम् उक्तिवैचित्र्यम्। काव्ये लोकोत्तररमणीयत्वनिष्पत्तये। अथवा रसपोषणायेति स्वीकुर्वन्तु। शब्दवैचित्र्येण अर्थवैचित्र्येण च अलंकारः द्विविधः इति नयः। उभयालंकारः तृतीयोऽपि भवतीति केचित्। अर्थालङ्कारे अर्थस्य प्राधान्यं दृश्यते। यतो हि अर्थवशात् एव काव्ये लोकोत्तरचमत्कारः उत्पद्यते। तेन काव्यम् इदम् अत्यन्तं रमणीयं भवति। तत्रापि बहुविधः अर्थालङ्कारः विद्यते। तेषु अर्थालङ्कारेषु सादृश्यघटितस्य उपमालङ्कारस्य आदौ विचारः क्रियते। यतो हि अर्थालङ्कारेषु सादृश्यमूलकस्य अलङ्कारस्य च प्राधान्यात् तेषाम् अपि उपजीव्यत्वेन प्रथमम् उपमालङ्कारम् कथयति इति विश्वनाथमतम्। पुनश्च उपमालङ्कारः विशेषसौन्दर्यजनकः अस्ति। साहित्यादिषु उपमालङ्कारस्य बहु प्रयोगः अस्ति। पुनश्च उपमालङ्कारः अत्यन्तं प्राचीनः भवति। अत एव उपमालङ्कारं प्रथमं वर्णयित्वा ततः अन्येषाम् अर्थालङ्काराणां विवरणं कुर्मः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् भवती वा -

- अर्थालङ्कारस्य लक्षणं ज्ञातुं प्रभवेत्।
- अर्थालङ्कारस्य उदाहरणानि ज्ञातुं प्रभवेत्।
- अर्थालङ्कारस्य वैशिष्ट्यानि ज्ञातुं प्रभवेत्।
- उपमालङ्कारस्य सुविस्तरं ज्ञानं प्राप्तुं शक्नुयात्।
- श्लोकादौ अर्थालङ्कारस्य निर्णयं कर्तुं शक्नुयात्।
- स्वयमपि अर्थालङ्कारेण श्लोकनिर्माणं कर्तुं योग्यो भवेत्।
- उदाहरणे अर्थालङ्कारस्य लक्षणसमन्वयः कथं कार्यः इति ज्ञातुं प्रभवेत्।

२६.१) अर्थालङ्कारः

अर्थचमत्कृतिम् अवलम्ब्य स्वीक्रियते अर्थालङ्कारः। अर्थात् यस्मिन् अलङ्कारे अर्थम् आश्रित्य काचित् चमत्कृतिः भवति चेत् स अर्थालङ्कारः इति कथ्यते। अर्थालङ्कारे समार्थकशब्दः परिवर्त्यते चेत् अपि अलङ्कारः तथैव स्थिरतया तिष्ठति। अर्थात् अर्थालङ्कारे समार्थकस्य शब्दस्य प्रयोगः शक्यः अस्ति। परन्तु अर्थालङ्कारे अर्थस्य एव प्राधान्यता तिष्ठति। अर्थालङ्कारे अर्थस्य तु परिवर्तनं कदापि न शक्यम् अस्ति। उपमारूपकादयः अर्थालङ्काराः भवन्ति।

वैशिष्ट्यानि - अत्र अर्थालङ्कारस्य वैशिष्ट्यानि कथ्यन्ते। तथाहि -

१. अर्थालङ्कारे समार्थकशब्दस्य प्रयोगः शक्यः अस्ति।
२. अर्थालङ्कारे शब्दपरिवर्तनं शक्यम् अस्ति।
३. अर्थालङ्कारे अर्थपरिवर्तनं शक्यम् न अस्ति।
४. अर्थालङ्कारस्य उदाहरणं भवति -उपमारूपकादयः।

२६.२) उपमालङ्कारः

साहित्यदर्पणनामके ग्रन्थे ग्रन्थकारः विश्वनाथः आदौ उपमालङ्कारं विवृणोति, अतिप्राचीनत्वात् प्रचुरप्रयोगात् च। उपमालङ्कारस्य लक्षणं प्राह-

"साम्यं वाच्यमवैधर्म्यं वाक्यैक्य (ये) उपमा द्वयोः"॥ इति।

अन्वयः - वाक्यैक्ये द्वयोः अवैधर्म्यं वाच्यं साम्यम् उपमा अलङ्कारः।

शब्दार्थः - वाक्यैक्ये - एकस्मिन् वाक्ये, द्वयोः - उपमानोपमेययोः, अवैधर्म्यम् - विरुद्धधर्मरहितम्, वाच्यम् - कथितम्, साम्यम् - सादृश्यम्, उपमा - उपमालङ्कारः।

सामान्यार्थः - विजातीयवस्तुनोः विरुद्धधर्मम् अनुक्त्वा यदि गुणक्रियागतसादृश्यम् इवादिशब्देन प्रतिपादितं स्यात्, स उपमालङ्कारः भवति। साधारणतया द्वयोः वस्तुनोः मध्ये साधर्म्यं वैधर्म्यं च तिष्ठति। द्वयोः वस्तुनोः वैधर्म्यम् अनुक्त्वा इवादिशब्देन सादृश्यं कथ्यते। तत् च सादृश्यं गुणक्रियादिगतं भवति। अर्थात् उपमानोपमेययोः विजातीयवस्तुनोः मध्ये कस्यचित् सादृश्यस्य कल्पना क्रियते। तत्र उपमालङ्कारः भवति। एवञ्च इवादिशब्देन सादृश्यस्य स्पष्टतया प्रतीतिः भवति। द्वयोः वस्तुनोः मध्ये विरुद्धस्य धर्मस्य उल्लेखः न स्यात्। साम्यं साधारणधर्मसम्बन्धरूपसादृश्यम् उपमा नाम अलङ्कारः इति। उपमानोपमेयरूपेण कल्पितयोः द्वयोः पदार्थयोः समानधर्मेण साधर्म्यं साम्यं वा निरूप्यते। साम्यं साधर्म्यं गुणक्रियादिरूपम्। उपमानोपमेयोभयगतः धर्मः सधर्मः इति।

उदाहरणे लक्षणसमन्वयः - चन्द्र इव मुखं सुन्दरम् इति उदाहरणम् अस्ति। चन्द्रः मुखं च इति सम्पूर्णं भिन्नं वस्तुद्वयम् अस्ति। सौन्दर्यत्वम् आह्लादकत्वं च चन्द्रे मुखे च वर्तते। सौन्दर्यत्वादिगुणेन चन्द्रमुखयोः सादृश्यम् उक्तम् अस्ति। पुनश्च इवादिशब्देन चन्द्रमुखयोः सादृश्यं स्पष्टम् उक्तम् अस्ति इति लक्षणसमन्वयः। अतः प्रकृतवाक्ये उपमालङ्कारः विद्यते।

स च उपमालङ्कारः द्विविधः भवति। यथा - १) पूर्णोपमा, २) लुप्तोपमा।

२६.२.१) पूर्णोपमा

लक्षणम् - पूर्णोपमायाः लक्षणम् आह-

"सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।

उपमेयं चोपमानं भवेत् वाच्यम्"॥ इति।

अन्वयः - यदि सामान्यधर्मः औपम्यवाचिशब्दः उपमेयं उपमानं च भवेत् सा पूर्णा उपमा इति वाच्यम्।

सामान्यार्थः - यस्मिन् उपमालङ्कारे सामान्यधर्मः, औपम्यवाचिशब्दः, उपमेयम्, उपमानम् भवेत् चेत् सा पूर्णोपमा इति वक्तव्यम्। पूर्णोपमायाः चत्वारि अङ्गानि सन्ति। तानि च – १) उपमेयम्, २) उपमानम्, ३) साधारणधर्मः, ४) सादृश्यवाचकशब्दः।

उदाहरणे लक्षणसमन्वयः - पूर्णोपमायाः लक्षणं भवति- कमलम् इव मुखं मनोज्ञम्। अर्थात् पद्मसदृशं सुन्दरं मुखम् इति वाक्यार्थः। अत्र उपमेये उपमाने च मनोज्ञत्वधर्मः विद्यते। अत एव मनोज्ञं साधारणधर्मः अस्ति। पुनश्च इवशब्देन कमलमुखयोः सादृश्यं स्पष्टतया प्रतीतिः भवति। अतः इवशब्दः औपम्यवाचकशब्दः। मुखम् उपमीयते (सदृशीक्रियते)। अतः मुखम् उपमेयम्। उपमीयते (सदृशीक्रियते) येन (कमलेन)। अतः कमलम् उपमानम् अस्ति। अस्मिन् अलङ्कारे चतुर्णाम् स्थितिः वर्तते। अत एव पूर्णोपमा इति उच्यते।

पूर्णोपमायाः पुनः द्विविधः भेदः अस्ति। ते च श्रौती आर्थी इति।

२६.२.२) लुप्तोपमा

लुप्ता उपमा यत्र सा लुप्तोपमा। अत्र उपमाशब्देन उपमाघटकपदार्थानां (उपमानोपमेयादीनाम्) ग्रहणं भवति। लुप्तः नाम अनुल्लिखितः। चतुर्षु उपमाघटकपदार्थेषु एकस्य द्वयोः त्रयाणां वा अनुल्लेखः स्यात्। लुप्तोपमायाः लक्षणम् -

"लुप्ता सामान्यधर्मादिः एकस्य यदि वा द्वयोः।

त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥"इति।

अन्वयः - यदि सामान्यधर्मादिः एकस्य द्वयोः त्रयाणां वा अनुपादाने लुप्ता। सापि पूर्ववत् श्रौत्यार्थी

सामान्यार्थः - सामान्यधर्मः, उपमेयम्, उपमानम्, औपम्यवाचकशब्दः इति एतेषु एकस्य द्वयोः त्रयाणां वा अनुपादानं भवति चेत् सा लुप्तोपमा इति कथ्यते। अर्थात् उपमायाः चतुर्ष्वंगेषु कस्यापि एकस्य, द्वयोः उत वा त्रयाणां अंगानां वा लोपः यत्र भवति चेत् सा लुप्तोपमा इति मन्तव्यम्। सा लुप्तोपमा द्विविधा भवति। ते च श्रौती, आर्थी इति। पूर्ववत् इत्यस्य अर्थस्तु पूर्णोपमावत् लुप्तोपमा अपि श्रौत्यार्थीभेदेन द्विविधा इति।

उदाहरणे लक्षणसमन्वयः - मुखं चन्द्र इव इति लुप्तोपमायाः उदाहरणम् अस्ति। यतो हि प्रकृते मुखचन्द्रयोः सादृश्ये मनोज्ञत्वम् एव कारणम्। उभयत्र मनोज्ञत्वम् अस्ति। प्रकृतोदाहरणे मनोज्ञत्वरूपः साधारणधर्मः नास्ति। अतः लुप्तोपमायाः उदाहरणम्। चन्द्र इव मनोज्ञम् इति वाक्ये मुखस्य उल्लेखः नास्ति। मुखम् उपमीयते। अतः उपमेयं मुखम्। प्रकृतवाक्ये उपमेयस्य अनुल्लेखः वर्तते। अतः लुप्तोपमायाः उदाहरणम् इदम् अस्ति।

२६.३) अनन्वयालङ्कारः

लक्षणम् - साहित्यदर्पणे अनन्वयालङ्कारस्य लक्षणं कथयति -

"उपमानोपमेयत्वम् एकस्यैव तु अनन्वयः"इति।

सामान्यार्थः - एकम् एव वस्तु युगपत् उपमेयत्वेन उपमानत्वेन च कल्पितं भवति चेत् स अनन्वयालङ्कारः भवति। अर्थात् उपमेयोपमानभावः एकवाक्यगतो भवति चेत् अनन्वयालङ्कारः भवति। यदि अनेकवाक्यगतः उपमेयोपमानभावः भवति तर्हि रसनोपमा उपमेयोपमा वा भवति। यथा - "चन्द्रायते शुक्लरुचापि हंसः" इति स्थले रसनोपमा वर्तते। पुनश्च "कमलेव मतिः मतिरिव कमला" इति स्थले उपमेयोपमा भवति। अत एव अनन्वयः एकवाक्यगतविषयः भवति इति तु अर्थतः सिद्धम्।

उदाहरणे लक्षणसमन्वयः - अत्र अनन्वयालङ्कारस्य उदाहरणं कथयति -

"राजीवमिव राजीवं जलं जलमिवाजनि।

चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे॥" इति।

श्लोकार्थः - शरतः आविर्भावे कमलं कमलवत्, जलं जलवत्, चन्द्रः चन्द्रवत्, निर्मलभावं धारयति।

राजीवम्, जलम्, चन्द्रश्च इति त्रीणि एव युगपत् उपमेयानि उपमानानि च भवन्ति। अर्थात् राजीवादिकम् उपमानम् उपमेयञ्च उभयम् अस्ति। अत्र राजीवादिरूपे एकस्मिन् वस्तुनि उपमेयोपमानभावकल्पना वर्तते इति लक्षणसमन्वयः। अनन्वयालङ्कारः सादृश्यमूलकालङ्कारः भवति। अयम् एव एकः अलङ्कारः वाक्यस्य सादृश्यमूलकः अलङ्कारः।

सादृश्यम् सर्वदा द्वयोः वस्तुनोः मध्ये सम्भवम् अस्ति। प्रकृते अनन्वयालङ्कारे एकम् एव वस्तु उपमानम् उपमेयञ्च अस्ति। अनन्वये द्वयोः वस्तुनोः अभावात् कथं सादृश्यमूलकः अलङ्कारः भवति।

अत्र समाधानं प्रदीयते यत् यद्यपि वस्तुदृष्ट्या उपमेयस्य उपमानत्वम्, उपमानस्य उपमेयत्वं न कदापि सम्भवम् अस्ति। तथापि कविकल्पनायां तत् सम्भवम् अस्ति। दृष्टिभेदे एकम् एव वस्तु एकवारम् उपमानत्वेन एकवारम् उपमेयत्वेन च ग्रहणं भवति।

२६.४) रूपकालङ्कारः

लक्षणम् - अलङ्कारनभसि रूपकालङ्कारः अत्यन्तं सुप्रसिद्धः वर्तते। कविराजः विश्वनाथः स्वकीये साहित्यदर्पणनामके ग्रन्थे रूपकालङ्कारस्य लक्षणं कथयति - "रूपकं रूपितारोपे विषये निरपह्नवे" इति।

अन्वयः - निरपह्नवे विषये रूपितारोपे रूपकं (अलङ्कारः) स्यात्।

शब्दार्थः - निरपह्नवे विषये - निषेधरहिते विषये, रूपितारोपे - उपमानपदार्थस्य तादात्म्ये अभेदे वा, रूपकम् - रूपकालङ्कारः स्यात्।

सामान्यार्थः - निषेधरहिते विषये उपमेये रूपितस्य उपमानपदार्थस्य आरोपः (अभेदतत्त्वेन प्रतीतिः) एव रूपकालङ्कारः। तात्पर्यं भवति - निषेधरहिते उपमेये उपमानेन साकम् उपमानपदार्थस्य अभेदकल्पना, स रूपकालङ्कारः भवति। उपमेयस्य उपमानात्मना प्रतीतिः भवति। उपमेयस्य उपमानेन साकम् अभेदप्रतीतिः जायते। अर्थात् विषयस्य उपरि विषयिणः अभेदारोपः क्रियते। अर्थात् उपमेयस्य उपरि उपमानस्य अभेदारोपः भवति। यथावस्थिते उपमेये उपमानस्य अभेदारोपः रूपकम् इत्यर्थः। रूपकम् उपमानोपमेययोः अभेदारोपं करोति। रूपयति अर्थात् अभेदारोपं करोति इति रूपकम्। विजातीयवस्तुनोः अत्यन्तं सादृश्यवशात् अभेदकल्पना सम्भवति। अत्र अत्यन्तं सादृश्यवशात् अभेदकल्पना जायते।

उदाहरणेन साकं लक्षणसमन्वयः - मुखचन्द्रः भाति इति रूपकालङ्कारस्य उदाहरणं भवति। अत्र उपमेयः निषेधरहितः अस्ति। उपमेयस्य (मुखस्य) उपमानेन (चन्द्रेण) साकम् अभेदकल्पना क्रियते। अत्र उपमेयस्य मुखस्य उपमानचन्द्रात्मना (चन्द्रत्वेन) प्रतीतिः भवति। मुखेन साकं चन्द्रस्य अभेदारोपः क्रियते। एतेन चन्द्राभिन्नं मुखं भाति। अत्र उपमेयस्य चन्द्रस्य उपमानेन चन्द्रेण साकम् अभेदारोपः भवति। प्रकृते अपि मुखचन्द्रयोः अत्यन्तं सादृश्यम् अस्ति। अत एव मुखचन्द्रयोः अभेदकल्पना जायते। अत एव रूपकालङ्कारः इति उच्यते।

पाठगतप्रश्नाः-४

अत्र केचित् अधः प्रश्नाः प्रदीयन्ते -

१. अर्थालङ्कारः कः।

२. अर्थालङ्कारस्य एकम् उदाहरणं कथयतु।

३. अर्थालङ्कारस्य एकं वैशिष्ट्यं लिखत।

४. उपमालङ्कारस्य लक्षणं लिखत।

५. उपमालङ्कारः कतिविधः।

६. पूर्णोपमायाः लक्षणं लिखत।

७. लुप्तोपमायाः लक्षणं लिखत।

८. अनन्वयालङ्कारस्य लक्षणं लिखत।

९. रूपकालङ्कारस्य लक्षणं लिखत।

१०. पूर्णोपमायाः चत्वारि अङ्गानि कानि सन्ति।

११. लुप्तोपमा कतिविधा भवति।

२६.५) उत्प्रेक्षालङ्कारः

सादृश्यमूलकः अलङ्कारः अयम्। काव्यमार्गे उत्पेक्षालङ्कारः कविजनस्य सकाशे अत्यन्तं प्रियः भवति। अलङ्कारशेखरे प्रोक्तम् - उत्प्रेक्षालङ्कारः एव श्रेष्ठः अलङ्कारः भवति। पुनश्च नववध्वाः हास्यवत् मनोरमः अयम् उत्प्रेक्षालङ्कारः।

लक्षणम् - साहित्यदर्पणे उत्प्रेक्षालङ्कारस्य लक्षणं प्रोक्तम् -

"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"इति।

अन्वयः - प्रकृतस्य परात्मना सम्भावना उत्प्रेक्षा भवेत्।

शब्दार्थः - प्रकृतस्य – उपमेयपदार्थस्य, परात्मना - उपमानपदार्थरूपेण, सम्भावना - संशयः, उत्प्रेक्षा - उत्प्रेक्षालङ्कारः स्यात्।

सामान्यार्थः - प्रकृतस्य (उपमेयस्य) परात्मना (उपमानात्मना) सम्भावना उत्प्रेक्षालङ्कारः इत्यर्थः। उपमेयस्य उपमानतादात्म्येन सम्भावनम् उत्प्रेक्षा इति भावः। अत्यन्तं सादृश्यवशात् उपमेयम् उपमानत्वेन आशङ्कते चेत् उत्प्रेक्षालङ्कारः भवति। उत्प्रेक्षा इत्यत्र उत् इत्यस्य ऊर्ध्वगामिनी, प्रेक्षा इत्यस्य दृष्टिः इत्यर्थः। यस्य कस्यचित् वस्तुनः भावनाकाले भावनाकारिणः दृष्टिः अत्यन्तम् ऊर्द्धगामिनी भवति। अत एव उत्प्रेक्षालङ्कारः इति नाम।

उपमेयोपमानयोः अत्यन्तं सादृश्यम् उत्प्रेक्षाघटकम् अस्ति। तथापि उपमेयोपमानयोः भेदज्ञानं तिरोहितं न भवति। भेदज्ञाने सत्यपि अभेदतया वर्णयितुम् अधिकतया कविः इच्छति। सम्भावनाशब्दस्य संशयः इति अर्थः भवति। तथापि शुद्धसंशयः न गृह्यते। स्थाणुर्वा पुरुषो वा इति ज्ञानं तु शुद्धसंशयात्मकं ज्ञानम्। अत्र स्थाणुरेव अयम् इति निश्चयात्मकं ज्ञानं तु सम्भावना पदवाच्या भवति।

उत्प्रेक्षालङ्कारस्य वैशिष्ट्यम्-

१. उपमावत् उत्प्रेक्षालङ्कारे अपि कविकल्पनायाः एका वास्तवभित्तिः विद्यते। यथा - तस्याः मुखं भाति पूर्णचन्द्र इवापरः"। इति।

२. उपमावत् उत्प्रेक्षालङ्कारे उपमानोपमेयभावः विद्यते। परन्तु अत्यन्तं सादृश्यवशात् उपमेयम् उपमानत्वेन शङ्कते। एतादृशं चिन्तनं भ्रमात्मकम् अस्ति, भ्रमात्मकं नास्ति इति उभयम् अपि वक्तुं शक्यते।

३. भ्रमः अयम् आहार्यः (ऐच्छिकः)। तस्मात् नूनं तव मुखं चन्द्रः इति स्थले नायकस्य ज्ञानं विद्यते यत् मुखं चन्द्रः च समानं वस्तु नास्ति।

४. सादृश्यमूलकः अयम् अलङ्कारः विद्यते।

उदाहरणे लक्षणसमन्वयः - अत्र उत्प्रेक्षालङ्कारस्य उदाहरणम् -

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।

गुणा गुणानुवन्धित्वात् तस्य सप्रसवा इव॥" इति।

श्लोकार्थः - ज्ञाने सत्यपि मौनं तिष्ठति, शक्तौ सत्याम् अपि क्षमा विद्यते, त्यागे सत्यपि गर्वभावः नास्ति। रघुवंशस्य नृपे परस्परविरोधिनः गुणाः एकत्र सहावस्थानं करोति। परस्परविरुद्धगुणाः सहोदरवत् तिष्ठन्ति।

अस्मिन् श्लोके ज्ञानादिगुणाः उपमेयं भवन्ति। सप्रसवाः उपमानं भवन्ति। ज्ञानादिगुणाः सप्रसवारूपेण उत्प्रेक्षन्ते। इवशब्देन तच्च सादृश्यम् अधिकतया स्फुट्यते। उपमेयम् (ज्ञानादिगुणान्) उपमानत्वेन (सप्रसवात्वेन) आशङ्कते। अत्यन्तं सादृश्यवशात् प्रकृतस्य (उपमेयस्य) ज्ञानादिगुणानां परात्मना (उपमानात्मना) सप्रसवात्मना सम्भावना क्रियते। अतः उत्प्रेक्षालङ्कारः विद्यते इति लक्षणसमन्वयः।

२६.६) अपह्नुतिः

अपह्नुतिः सादृश्यमूलकः अलङ्कारः अस्ति। उपमेयोपमानविषयकः अलङ्कारः अयम्। अपह्नवः इत्यस्य गोपनं करोति इत्यर्थः। आरोपविषयस्य (उपमेयस्य) अपह्नवनकरणम् भवति। अत एव अपह्नुत्यलङ्कारः इति कथ्यते।

लक्षणम् - कविराजः विश्वनाथः स्वकीये साहित्यदर्पणनामके ग्रन्थे अपह्नुत्यलङ्कारस्य लक्षणं प्राह-

"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः॥"इति।

अन्वयः - प्रकृतं प्रतिषिध्य अन्यस्थापनं स्यात् अपह्नुतिः।

शब्दार्थः - प्रकृतम् - उपमेयम्, प्रतिषिध्य – साक्षात् परोक्षात् वा निषिध्य, अन्यस्य – उपमानस्य, स्थापनम् - प्रतिष्ठापनम्, अपह्नुतिः - अपह्नुत्यलङ्कारः, स्यात् - भवेत्।

सामान्यार्थः - उपमेयस्य निषेधपूर्वकम् उपमेयस्य उपमानतादात्म्येन उपपादनम् अपह्नुत्यलङ्कारः इत्यर्थः। प्रकृतस्य (उपमेयस्य) प्रतिषेधं कृत्वा अन्यस्य (उपमानस्य) स्थापनम् (आरोपकरणम्) अपह्नुत्यलङ्कारः इत्यर्थः। अत्र रुद्रटस्य मतेन अपह्नुत्यलङ्कारः चर्च्यते। उपमेयनिषेधपूर्वकम् उपमेये उपमानस्य सत्यरूपेण स्थापनं भवति। अस्य तु कारणं उपमानोपमेययोः अत्यन्तं सादृश्यम्। रुद्रटेन प्रोक्तम् - "अतिसाम्यात् उपमेयं यस्यामसदेव कथ्यते सदपि"॥ इति। वामनेन प्रोक्तम् - "समेन वस्तुना अन्यापलापोऽपह्नुतिः॥"इति। अर्थात् निषेध्यस्थाप्यवस्तुद्वययोः मध्ये सादृश्यम्

अत्यन्तम् आवश्यकम्। उपमेयस्य निषेधः द्विधा भवति। १) आदौ निषेधः पश्चात् आरोपः, २) आदौ आरोपः अनन्तरं निषेधः इति।

वैशिष्ट्यम् -

१. उपमेयस्य वस्तुनः निषेधः भवति।

२. उपमेयस्य स्थाने उपमानस्य स्थापनं भवति।

३. उपमेयस्य निषेधः उपमानस्य स्थापनम् (आहार्यः) ऐच्छिकः विद्यते।

४. अपह्नुत्यलङ्कारः सादृश्यमूलकः अलङ्कारः अस्ति।

५. उदाहरणे लक्षणसमन्वयः - उपमेयस्य निषेधः द्विधा भवति। १) आदौ निषेधः पश्चात् आरोपः, २) आदौ आरोपः अनन्तरं निषेधः इति।

उदाहरणे लक्षणसमन्वयः - अत्र अपह्नुवपूर्वकम् आरोपस्य उदाहरणं प्रोच्यते -

"नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।

नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः॥"

श्लोकार्थः - इदं गगनं नास्ति, अम्बोः राशिः अस्ति। एतानि नक्षत्राणि न सन्ति, एते तु नवफेनसमूहाः। नायं चन्द्रः वर्तते, अपि तु कुण्डलितः फणिः। नायं चन्द्रस्य कलङ्कः, अपि तु शयितः कृष्णः इति।

अस्मिन् श्लोके नभोमण्डलम्, तारा, शशी, कलङ्कः च इति एते उपमेयाः सन्ति। अत्र अम्बुराशिः, नवफेनभङ्गः, कुण्डलितः फणीन्द्रः, मुरारिः इति एतानि उपमानानि सन्ति। अत्र श्लोके आकाशम्, शशी, कलङ्कः इति सर्वं सत्यम् अस्ति। किन्तु आदौ नञा प्रकृतं गगनादिकं निषिध्य ततः परम् अप्रकृतस्य सागरस्य, फेनसमूहस्य, फणीन्द्रस्य च सत्यरूपेण स्थापनं क्रियते। अत्र निषेधस्थापनयोः हेतुः सादृश्यम्। नक्षत्रशोभितेन गगनेन साकं फेनराशिसमूहस्य अत्यन्तं सादृश्यम् अस्ति। नञ् - शब्देन उपमेयस्य निषेधपूर्वकम् उपमानस्य आरोपः क्रियते। अतः प्रकृते अपह्नुवपूर्वकम् आरोपरूपस्य अपह्नुत्यलङ्कारस्य वर्णनं क्रियते।

आरोपपूर्वकम् अपह्नुतेः दृष्टान्तः प्रदीयते। अस्य उदाहरणं भवति -

"विराजति व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः।

फणीश्वरोऽयं द्विजराजमूर्त्तिर्नवाम्बुदश्रीर्ननु तस्य लक्ष्म॥"इति।

नभःशरीरं सिन्धुः शोभमान्, तस्मिन् सिन्धौ नक्षत्ररूपी फेनसमूहः दृश्यते। अत्र वपुःशब्देन मयट्-प्रत्ययेन च यथाक्रमं व्योमस्य नक्षत्रस्य (उपमेयस्य) च निषेधं करोति। परन्तु निषेधवाचकं नञादिकं तु साक्षात् नास्ति। वस्तुतस्तु गगने नक्षत्रे च समुद्रस्य फेनसमूहस्य आरोपः क्रियते। स च निषेधः गगनादीनां निषेधं विना न कदापि सम्भवति। अत एव प्रकृते आदौ आरोपः ततः निषेधः अस्ति। अत्रापि तथा आरोपे सादृश्यम् एव कारणम्। अत एव आरोपपूर्वकम् अपह्नवमूलकम् अपह्नुत्यलङ्कारः वर्णितः।

२६.७) दृष्टान्तालङ्कारः

दृष्टान्तालङ्कारः तु बिम्बप्रतिबिम्बभावमूलकः अलङ्कारः। साधर्म्यवैधर्म्यभेदात् दृष्टान्तालंकारः अपि द्विविधं भवति।

लक्षणम् - साहित्यदर्पणे दृष्टान्तालङ्कारस्य लक्षणं प्राह-

"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

अन्वयः - सधर्मस्य वस्तुनः प्रतिबिम्बनं दृष्टान्तः।

शब्दार्थः - सधर्मस्य – समानधर्मविशिष्टस्य, वस्तुनः - पदार्थस्य, प्रतिबिम्बम् - प्रतिबिम्बभावेन, स्थापनम् दृष्टान्तः अलङ्कारः भवति।

सामान्यार्थः - प्रस्तुतस्य समर्थने सदृशस्य वस्तुनः प्रतिबिम्बरूपेण उपस्थापनं दृष्टान्तालङ्कारः। दृष्टः अन्तः समर्थनीये समर्थकस्य स्वरूपं सादृश्यं यस्मिन् स दृष्टान्तः अलङ्कारः इत्यर्थः। अर्थात् समर्थनीये वस्तुनि समर्थकस्य वस्तुनः यत् सादृश्यं तत् दृष्टान्तालङ्कारः इत्यर्थः। एकं दृष्टान्तवाक्यम्। अपरं दार्ष्टान्तिकं वाक्यम्। प्रथमं समर्थकं वाक्यम्। अपरं समर्थ्यं वाक्यम्। अत्रापि बिम्बप्रतिबिम्बभावयोः मध्ये सादृश्यम् एव नियामकम्। पुनश्च अत्र सादृश्यं वाच्यलभ्यं न भवेत्। सादृश्यं तात्पर्येण गम्यम्। प्रणिधानगम्यं सादृश्यं बिम्बप्रतिबिम्बभावः एव। तथाहि - प्रतिबिम्बनं प्रणिधानगम्यसाम्यत्वम् इति। प्रतिबिम्बम् बिम्बात् भिन्नं भवति। तथापि प्रतिबिम्बं बिम्बसदृशम् एव भवति।

वैशिष्ट्यानि - अत्र दृष्टान्तालङ्कारस्य वैशिष्ट्यानि प्रोच्यन्ते।

१. स्वतन्त्रं वाक्यद्वयम् भवेत्।
२. एकस्य वाक्यस्य समर्थने अपरं वाक्यम् उपयोगि स्यात्। तयोः उपमेयोपमानभावसम्बन्धः अस्ति।
३. उपमानस्य उपमेयस्य च धर्मः पृथक्तया कथितो भवेत्।
४. धर्माणां मध्ये सादृश्यं स्यात्।
५. पुनश्च सादृश्यं वाच्यं न भवति। अपि तु सादृश्यं तात्पर्यगम्यं भवति।

उदाहरणे लक्षणसमन्वयः - अत्र दृष्टान्तालङ्कारस्य उदाहरणं प्राह दर्पणकारः साहित्यदर्पणे -

"अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।

अनधिगतपरिमलापि हि हरति दृशं मालतीमाला॥"इति।

सामान्यार्थः - अविदितगुणाऽपि - अर्थबोधरहिता अपि, भणितिः - वाणी, वसति - प्रकटयति, दृशं - नेत्रम्, हरति - आकर्षति। रसभासादिकाव्यगुणानाम् अविद्यमाने अपि उत्तमकवेः काव्यश्रवणेन श्रोतुः कर्णे मधुरधारां वर्षति। यथा- सौरभस्य आघ्राणं न भवति चेदपि मालतीपुष्पस्य माला नेत्रं हरति।

पद्ये अस्मिन् स्वतन्त्रं वाक्यद्वयम् अस्ति। किन्तु अर्थानुसन्धानकाले अवगम्यते यत् द्वितीयवाक्यं प्रथमवाक्यस्य समर्थकम् अस्ति। वाक्यद्वये वमनम् हरणञ्च इति साधारणधर्मद्वयम्। अत्र मधुधारावमनम् नेत्रहरणञ्च अभिन्नं नास्ति। तथापि उभयत्र आनन्दजनकत्वरूपं भावगतसादृश्यम् अस्ति। आनन्दजनकत्वरूपं सादृश्यं तात्पर्यगम्यम् अस्ति। रसभासादिकाव्यगुणानाम् अविद्यमाने अपि उत्तमकवेः वाणी मधुरधारां वर्षति इति प्रथमवाक्यस्य वर्णनाय अनधिगतपरिमालायाः अपि मालतीमालायाः नयनलोभनीयत्वम् इति अपरवाक्यस्य वर्णना क्रियते। अत्र बिम्बप्रतिबिम्बभावसम्बन्धः विद्यते। अत्रापि सादृश्यवशात् बिम्बप्रतिबिम्बभावः भवति इति दृष्टान्तालङ्कारस्य लक्षणसमन्वयः अस्ति।

पाठगतप्रश्नाः-२

अत्र केचित् प्रश्नाः अधः प्रदीयन्ते -

१२. उत्प्रेक्षालङ्कारः कीदृशः अलङ्कारः।

१३. उत्प्रेक्षालङ्कारस्य लक्षणं लिखतु।

१४. उत्प्रक्षालङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१५. अपह्नुत्यलङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१६. अपह्नुत्यलङ्कारस्य लक्षणं लिखत।

१७. अपह्नुत्यलङ्कारे उपमेयस्य निषेधः कतिधा भवति।

१८. दृष्टान्तालङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१९. दृष्टान्तालङ्कारस्य लक्षणं लिखतु।

२६.८) समासोक्तिः

लक्षणम् - कविराजः विश्वनाथः साहित्यदर्पणनामके ग्रन्थे समासोक्त्यलङ्कारस्य लक्षणं प्राह -

"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥"इति।

अन्वयः - समैः कार्यलिङ्गविशेषणैः प्रस्तुते अन्यस्य वस्तुनः यत्र व्यवहारसमारोपः सा समासोक्तिः। कार्याणि च लिङ्गानि च विशेषणानि च तैः कार्यलिङ्गविशेषणैः इति इतरेतरद्वन्द्वसमासः।

शब्दार्थः - समैः - समानैः (प्रस्तुते अप्रस्तुते च तुल्यरूपे विद्यमानम्, तैः), कार्यलिङ्गविशेषणैः - आलिङ्गनादिक्रियया, पुंस्त्वादिलिङ्गेन, नीलत्वादिव्यावर्तकधर्मैः, प्रस्तुते - उपमेयपदार्थे, अप्रस्तुतस्य – उपमानपदार्थस्य, व्यवहारस्य – आचरणस्य, समारोपः - सम्यक्तया आरोपः यत्र भवति, सा समासोक्तिः इति।

सामान्यार्थः - समानक्रियाभिः, समानलिङ्गैः, समानविशेषणैः वा उपमेये उपमानस्य व्यवहारसमारोपः भवति चेत् सा समासोक्तिः भवति। समासेन (संक्षेपेन) उक्तिः (अर्थद्वयकथनम्) सा समासोक्तिः। आरोपे सादृश्यम् एव कारणम्। पुनश्च अत्र लिङ्गं क्रिया विशेषणञ्च आश्रित्य सादृश्यं भवति। प्रस्तुतेन साकम् अप्रस्तुतस्य साक्षात् सादृश्यं न विद्यते। वस्तुतस्तु अत्र वाक्ये अप्रस्तुतस्य उल्लेखः न विद्यते। लिङ्गादीनां सादृश्यवशात् अप्रस्तुतस्य प्रतीतिः भवति। केषाञ्चित् मते तु केवलं विशेषणं सदृशस्य आश्रयः भवति। अर्थात् समानविशेषणवशात् उपमेये उपमानस्य व्यवहारसमारोपः भवति। अलङ्कारसर्वस्वकारः कथयति - "श्लिष्टविशेषणैरुपमानधीः समासोक्तिः। "इति। मम्मटः अपि कथयति - "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः"इति।

उदाहरणे लक्षणसमन्वयः- अत्र समासोक्त्यलङ्कारस्य उदाहरणं तावत् -

"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।

अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः॥"इति।

श्लोकार्थः - यस्य जयेच्छा पूर्णा न जाता। तादृशस्य नीतिज्ञस्य पुरुषस्य रमणीसम्भोगस्य स्पृहा कथं सम्भवति। सूर्यः अखिलं जगत् अनाक्रम्य सन्ध्यया साकं न मिलति। अत्र सूर्यः प्रस्तुतः, नायकः अप्रस्तुतः अस्ति। सन्ध्या प्रस्तुता, नायिका अप्रस्तुता भवति। अस्मिन् श्लोके सूर्ये नायकस्य सन्ध्यायां नायिकायाः च व्यवहारसमारोपः अस्ति। अस्मिन् समारोपे लिङ्गसाम्यं कारणं भवति। विश्वनाथः कथयति - "अत्र पुंस्त्रीलिङ्गमात्रेण रविसन्ध्ययोः नायकनायिकायाः व्यवहारः॥"इति। अत्र रविः तेजोमात्रं भवति। सन्ध्या कालविशेषः भवति। तथापि रविशब्दस्य पुंलिङ्गवशात् नायकस्य व्यवहारसमारोपः भवति। एवञ्च सन्ध्याशब्दस्य स्त्रीलिंङ्गवशात् नायिकायाः व्यवहारसमारोपः भवति। अत्र दृष्टान्तत्वेन अप्रकृतयोरपि रविसन्ध्ययोः प्रकृताङ्गत्वेन एव प्रकृतत्वम् अवधेयम्।

२६.९) अतिशयोक्तिः

भरतपरवर्तिनः प्रायः सर्वे एव अतिशयोक्त्यलङ्कारं स्वीकृतवन्तः। अतिशयेन सम्भवातिरेकेण योग्यतातिक्रमेण वा उक्तिः अतिशयोक्तिः। अत्युक्तिः अतिशयोक्तिः इति वाग्भट्टः।

लक्षणम् - अत्र दर्पणकारः अतिशयोक्त्यलङ्कारस्य लक्षणं कथितवान् -

"सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिर्निगद्यते" इति।

अन्वयः - (प्रकृतस्य परात्मना) अध्यवसायस्य सिद्धत्वे अतिशयोक्तिः निगद्यते।

शब्दार्थः - अध्यवसायस्य – प्रकृतेन सह अप्रकृतस्य (यथार्थवस्तुना सह अयथार्थवस्तुना) अभेदप्रतीतेः, सिद्धत्वे - निश्चयात्मके अतिशयोक्तिः - अतिशयोक्त्यलङ्कारः भवति।

सामान्यार्थः - विषयेण साकं विषयिणः अभेदप्रतीतेः निश्चयात्मके सति अतिशयोक्त्यलङ्कारः स्यात्। अध्यवसायः नाम अयथार्थवस्तुना यथार्थवस्तुनः निगरणम्। अर्थात् उपमेयस्य निगरणपुरःसरम् उपमानेन सह तस्य अभेदज्ञानम् अध्यवसायः। विश्वनाथः कथयति - "विषयनिगरणेन अभेदप्रतिपत्तिः विषयिणः अध्यवसायः॥" इति। अर्थात् यथार्थवस्तुनः आच्छादनपूर्वकम् अयथार्थवस्तुनः अभेदप्रतीतिः

अतिशयोक्तिः भवति। उत्प्रेक्षालङ्कारे सम्भावना अनिश्चितरूपा। अतिशयोक्तौ कविप्रौढोक्तिवशात् सम्भावना निश्चितरूपा भवति।

उदाहरणे लक्षणसमन्वयः - अत्र विश्वनाथः अतिशयोक्त्यलङ्कारस्य उदाहरणं निरूयति-

"कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्।

कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्॥"इति।

श्लोकार्थः - नायिकायाः मस्तके मयूरपुच्छः, तस्य अधः अष्टमीन्दुखण्डः, तस्य अधः चञ्चलं नीलोत्पलयुगलम्, तस्य अधः तिलकुसुमम्, तस्य एकं प्रवालम् कथम्।

श्लोके "कथम्" इति पदं प्रश्नसूचकं नास्ति। अपि तु कथम् इति पदं सम्भावनासूचकम् अस्ति। अत्र नायिकाकेशकलापभालस्थलनेत्रयुगलनासिकाधरोष्ठानाम् उपमेयानां कलापिकलापादिभिः उपमानैः सह अभेदज्ञानात् अध्यवसायस्य सिद्धत्वम् इति अतिशयोक्तेः उदाहरणम्। केशपाशं मयूरकलापत्वेन, कपालम् अर्धचन्द्रत्वेन, नयनद्वयं नीलोत्पलत्वेन, नासिकाम् तिलकुसुमत्वेन, औष्ठं रक्तप्रवालत्वेन अध्यवसायः कृतः। अर्थात् केशपाशादेः प्रकृतस्य मयूरकलापादिना अप्रकृतेन सह अभेदनिश्चयः भवति। प्रकृते केशादिः उपमेयः कलापादिः उपमानञ्च परस्परं भिन्नम्। तथापि उपमानस्य उत्कटप्राधान्ये उपमेयस्य निगरणजनिता अभेदप्रतीतिः भवति। अतिशयोक्तेः बहवः विभागाः सन्ति। प्रकृते तु अतिशयोक्त्यलङ्कारस्य भेदाः नैव चर्चिताः।

पाठगतप्रश्नाः-३

२०. समासोक्त्यलङ्कारस्य लक्षणं लिखतु।

२१. समासोक्तिः इत्यस्य अर्थः कः।

२२. मम्मटमतेन समासोक्तेः लक्षणं किम्।

२३. समासोक्त्यलङ्कारे आरोपे किं कारणं भवति।

२४. अतिशयोक्त्यलङ्कारस्य लक्षणं किम्।

२५. वाग्भट्टमतने अतिशयोक्तिः नाम का।

२६. अध्यवसायः नाम कः।

पाठसारः

अस्मिन् पाठे अर्थालङ्कारः आलोच्यते। अर्थालङ्कारे शब्दपरिवर्तनं शक्यम्। अत्र अर्थवशात् चमत्कृतिः उत्पद्यते। उपमादयः अर्थालङ्कारः भवति। प्रायः सादृश्यमूलकः अलङ्कारः आलोच्यते। विजातीयवस्तुनोः विरुद्धधर्मम् अनुक्त्वा यदि गुणक्रियागतसादृश्यम् इवादिशब्देन प्रतिपादितं स्यात्, स

उपमालङ्कारः भवति। सा च पूर्णोपमा लुप्तोपमा इति भेदात् द्विविधा। ततः अनन्वयालङ्कारं प्रतिपादितवान्। एकम् एव वस्तु युगपत् उपमेयत्वेन उपमानत्वेन च कल्पितं भवति चेत् स अनन्वयालङ्कारः भवति। ततः रूपकालङ्कारम्, दृष्टान्तालङ्कारम्, उत्प्रेक्षालङ्कारम्, अपह्नुत्यलङ्कारान् प्रतिपादितवान्। प्रायः एते सर्वे एव अलङ्काराः सादृश्यमूलकाः सन्ति। रूपकाद्यलङ्काराणाम् उदाहरणपुरःसरं लक्षणानि वैशिष्ट्यानि च प्रोक्तानि। सादृश्ये सति एव एते अलङ्काराः भवन्ति। मम्मटाद्याचार्याणां मतानि अत्र प्रोक्तानि। किन्तु साहित्यदर्पणकारस्य निर्मितानि लक्षणानि पाठे अस्मिन् गृहीतानि सन्ति। काव्यमार्गे अलङ्काराः एव काव्यस्य सौन्दर्यं वर्धयन्ति। काव्ये अलङ्कारस्य विद्यमानात् काव्यम् अत्यन्तं ग्राह्यम् अस्ति। काव्यजगति अन्ये अपि अलङ्काराः सन्ति। परन्तु अस्मिन् पाठे केचित् प्रसिद्धाः अलङ्काराः गृहीताः।

पाठान्तप्रश्नाः

१. अर्थालङ्कारस्य विषये लघुटिप्पणीं रचयत।
२. उदाहरणपुरःसरम् उपमालङ्कारान् वर्णयत।
३. उपमालङ्कारस्य भेदान् प्रतिपाद्य तेषां परिचयं कारयतु।
४. उदाहरणपुरःसरम् उपमालङ्कारस्य प्रत्येकं भेदान् वर्णयत।
५. उदाहरणपुरःसरम् उत्प्रेक्षालङ्कारं वर्णयत।
६. उदाहरणपुरःसरम् दृष्टान्तालङ्कारं वर्णयत।
७. उत्प्रेक्षालङ्कारस्य वैशिष्ट्यानि लिखन्तु।
८. अपह्नुत्यलङ्कारस्य वैशिष्ट्यानि लिखन्तु।
९. उदाहरणपुरःसरम् अपह्नुत्यलङ्कारं वर्णयत।
१०. उदाहरणपुरःसरम् रूपकालङ्कारान् वर्णयत।
११. उदाहरणपुरःसरम् समासोक्त्यलङ्कारान् वर्णयत।
१२. उदाहरणपुरःसरम् अतिशयोक्त्यलङ्कारान् वर्णयत।

पाठगतप्रश्नानाम् उत्तराणि

१. यस्मिन् अलङ्कारे अर्थम् आश्रित्य काचित् चमत्कृतिः भवति चेत् स अर्थालङ्कारः।
२. उपमालङ्कारः।
३. अर्थालङ्कारे समार्थकशब्दस्य प्रयोगः शक्यः अस्ति।
४. "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः"॥ इति।
५. द्विविधः।

६. "सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।

७. उपमेयं चोपमानं भवेत् वाच्यम्" ॥इति।

८. "लुप्ता सामान्यधर्मादिः एकस्य यदि वा द्वयोः।

९. त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥"इति।

१०. "उपमानोपमेयत्वम् एकस्यैव तु अनन्वयः"इति।

११. "रूपकं रूपितारोपे विषये निरपह्नवे" इति।

१२. १) उपमेयम्, २) उपमानम्, ३) साधारणधर्मः, ४) सादृशवाचकशब्दः।

१३. द्विविधा।

१४. सादृश्यमूलकोपमा।

१५. "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"इति।

१६. सादृश्यमूलकः अयम् अलङ्कारः विद्यते।

१७. उपमेयस्य निषेधः उपमानस्य निषेधश्च (आहार्यः) ऐच्छिकः विद्यते।

१८. "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

१९. द्विविधा।

२०. अत्र सादृश्यं वाच्यं न भवति। अपि तु सादृश्यं तात्पर्यगम्यं भवति।

२१. "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

२२. "समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

२३. व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥"इति

२४. समासेन उक्तिः।

२५. परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः"इति।

२६. सादृश्यम्।

२७. "सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिर्निगद्यते"। इति।

२८. अत्युक्तिः।

२९. विषयनिगरणेन अभेदप्रतिपत्तिः विषयिणः अध्यवसायः

विशेषशब्दावली

उपमेयम्

तत्र सादृश्यानुयोगि उपमेयम्। उपमीयते यत् तत् उपमेयम्। मि-धातोः परिमापः अर्थः। वर्णनीयः विषयः उपमेयम् अस्ति। यथा चन्द्र इव मुखम्। येन साकं यस्य तुलना क्रियते, तत् उपमेयम्। चन्द्रेण साकं मुखस्य तुलना क्रियते। अतः मुखम् उपमेयम् अस्ति। प्रायः तुलना तु महता साकं लघुनः वस्तुनः

क्रियते। अत्र प्रकृते चन्द्रः अधिकः सुन्दरवान् अस्ति। मुखस्य सुन्दरता तु चन्द्रापेक्षया न्यूनम् अस्ति। अतः लघु वस्तु उपमेयम् अस्ति।

उपमानम्

तत्र सादृश्यप्रतियोगि उपमानम्। उपमीयते सदृशीक्रियते येन तद् उपमानम्। वर्णनीयस्य उपमेयस्य उपकारकम् उपमानम् अस्ति। यस्य वस्तुनः येन साकं तुलना क्रियते, तत् उपमानम् भवति। यथा - चन्द्र इव मुखम् इति। अत्र तु मुखस्य चन्द्रेण साकं तुलना क्रियते। अतः चन्द्रः उपमानम् अस्ति। प्रायः तुलना तु महता साकं लघुनः वस्तुनः क्रियते। अत्र प्रकृते चन्द्रः अधिकः सुन्दरवान् अस्ति। मुखस्य सुन्दरता तु चन्द्रापेक्षया न्यूनम् अस्ति। अत महत् वस्तु उपमानम् अस्ति।

साधारणधर्मः

उपमेये उपमाने च सङ्गतधर्मः साधारणधर्मः। अर्थात् उपमेये उपमाने च उभयत्र यः समानः धर्मः तिष्ठति, स साधारणधर्मः भवति। यथा चन्द्र इव मुखं सुन्दरम् इति। अत्र चन्द्रे मुखे च समानः धर्मः सौन्दर्यत्वं च अस्ति। उभयत्र विद्यमानं सौन्दर्यत्वधर्मम् आधारीकृत्य एव तुलना क्रियते। अत एव उभयत्र विद्यमानः धर्मः साधारणधर्मः।

औपम्यवाचकशब्दः

उपामायाः भावः औपम्यम्। इवादिशब्दः उपमावाचकः भवति। अर्थात् येन शब्देन सादृश्यस्य स्पष्टप्रतीतिः जायते। यथा - चन्द्र इव मुखम् इति। अत्र चन्द्रेण साकं मुखस्य साधर्म्यम् अस्ति इति एतत् तु इवादिशब्देन स्पष्टं ज्ञायते। अत एव इवादिशब्दाः उपमावाचकशब्दाः भवन्ति।

बिम्बम्

साक्षात् यत् वस्तु तत् बिम्बम्। यथा - मुखम्। यथा दर्पणे वयं मुखं पश्यामः। एकं तु अस्माकं मुखम्। अपरं दर्पणनिष्ठं मुखम्। साक्षात् मानवानां यत् मुखं तत् बिम्बम् अस्ति। यस्य प्रतिच्छविः दर्पणे अस्ति, तत् बिम्बम्।

प्रतिबिम्बम्

कस्मिञ्चित् वस्तुनि पतितः प्रतिच्छविः, तत् प्रतिबिम्बम्। यथा - दर्पणे स्थितं मुखम्। यदा वयं दर्पणे मुखं पश्यामः। तदा तु दर्पणे मुखस्य कश्चित् प्रतिच्छविः दृश्यते। तत् एव प्रतिबिम्बम् अस्ति।

प्रणिधानगम्यम्

प्रणिधानगम्यम् इत्यस्य अर्थः तु तात्पर्येण गम्यमानः अर्थः इति। साक्षात् वाच्यार्थः न भवति। परन्तु तात्पर्येण सः अर्थः गम्यते।

॥ इति षड्विंशः पाठः ॥